श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये त्रयोविंशं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये त्रयोविंशं दशकम् ॥

## दक्षचरितं, चित्रकेतूपाख्यानं, वृत्रवधवर्णनं, मरुदुत्पत्तिवर्णनं च

प्राचेतसस्तु भगवन्नपरो हि दक्ष -
स्त्वत्सेवनं व्यधित सर्गविवृद्धिकामः।
आविर्बभूविथ तदा लसदष्टबाहु -
स्तस्मै वरं ददिथ तां च वधूमसिक्नीम् ॥ 23.1 ॥

तस्यात्मजास्त्वयुतमीश पुनस्सहस्रं
श्रीनारदस्य वचसा तव मार्गमापुः।
नैकत्रवासमृषये स मुमोच शापं
भक्तोत्तमस्त्वृषिरनुग्रहमेव मेने ॥ 23.2 ॥

षष्ट्या ततो दुहितृभिः सृजतः कुलौघान्
दौहित्रसूनुरथ तस्य स विश्वरूपः।
त्वत्स्तोत्रवर्मितमजापयदिन्द्रमाजौ
देव त्वदीयमहिमा खलु सर्वजैत्रः ॥ 23.3 ॥

प्राक्शूरसेनविषये किल चित्रकेतुः
पुत्राग्रही नृपतिरङ्गिरसः प्रभावात्।
लब्ध्वैकपुत्रमथ तत्र हते सपत्नी -
सङ्घैरमुह्यदवशस्तव माययासौ ॥ 23.4 ॥

तं नारदस्तु सममङ्गिरसा दयालुः
सम्प्राप्य तावदुपदर्श्य सुतस्य जीवम्।

कस्यास्मि पुत्र इति तस्य गिरा विमोहं
    त्यक्त्वा त्वदर्चनविधौ नृपतिं न्ययुङ्क्त ॥ **23.5** ॥

स्तोत्रं च मन्त्रमपि नारदतोऽथ लब्ध्वा
    तोषाय शेषवपुषो ननु ते तपस्यन् ।
विद्याधराधिपतितां स हि सप्तरात्रे
    लब्ध्वाप्यकुण्ठमतिरन्वभजद्भवन्तम् ॥ **23.6** ॥

तस्मै मृणालधवलेन सहस्रशीर्ष्णा
    रूपेण बद्धनुतिसिद्धगणावृतेन ।
प्रादुर्भवन्नचिरतो नुतिभिः प्रसन्नो
    दत्वाऽऽत्मतत्त्वमनुगृह्य तिरोदधाथ ॥ **23.7** ॥

त्वद्भक्तमौलिरथ सोऽपि च लक्षलक्षं
    वर्षाणि हर्षुलमना भुवनेषु कामम् ।
सङ्गापयन् गुणगणं तव सुन्दरीभिः
    सङ्गातिरेकरहितो ललितं चचार ॥ **23.8** ॥

अत्यन्तसङ्गविलयाय भवत्प्रणुन्नो
    नूनं स रूप्यगिरिमाप्य महत्समाजे ।
निश्शङ्कमङ्ककृतवल्लभमङ्गजारिं
    तं शङ्करं परिहसन्नुमयाभिशेपे ॥ **23.9** ॥

निस्सम्भ्रमस्त्वयमयाचितशापमोक्षो
    वृत्रासुरत्वमुपगम्य सुरेन्द्रयोधी ।
भक्त्यात्मतत्त्वकथनैः समरे विचित्रं
    शत्रोरपि भ्रममपास्य गतः पदं ते ॥ **23.10** ॥

त्वत्सेवनेन दितिरिन्द्रवधोद्यताऽपि
    तान्प्रत्युतेन्द्रसुहृदो मरुतोऽभिलेभे ।

दुष्टाशयेऽपि शुभदैव भवन्निषेवा
तत्तादृशस्त्वमव मां पवनालयेश ॥ **23.11** ॥

॥ इति श्रीमन्नारायणीये त्रयोविंशं दशकं समाप्तम् ॥